# শ্রীদশমহাবিদ্যাকবচম্

{॥ শ্রীদশমহাবিদ্যাকবচম্ ॥}

বিনিযোগঃ

ওঁ অস্য শ্রীমহাবিদ্যাকবচস্য শ্রীসদাশিব ঋষিঃ উষ্ণিক্ ছন্দঃ

শ্রীমহাবিদ্যা দেবতা সর্বসিদ্ধীপ্রাপ্ত্যর্থে পাঠে বিনিযোগঃ।

ঋষ্যাদি ন্যাসঃ

শ্রীসদাশিবঋষযে নমঃ শিরসী উষ্ণিক্ ছন্দসে নমঃ মুখে

শ্রীমহাবিদ্যাদেবতাযৈ নমঃ হৃদি সর্বসিদ্ধিপ্রাপ্ত্যর্থে

পাঠে বিনিযোগায নমঃ সর্বাঙ্গে।

মানসপুজনম্

ওঁ পৃথ্বীতত্ত্বাত্মকং গন্ধং শ্রীমহাবিদ্যাপ্রীত্যর্থে সমর্পযামি নমঃ।

ওঁ হং আকাশতত্ত্বাত্মকং পুষ্পং শ্রীমহাবিদ্যাপ্রীত্যর্থে সমর্পযামি নমঃ।

ওঁ যং বাযুতত্ত্বাত্মকং ধূপং শ্রীমহাবিদ্যাপ্রীত্যর্থে আঘ্রাপযামি নমঃ।

ওঁ রং অগ্নিতত্ত্বাত্মকং দীপং শ্রীমহাবিদ্যাপ্রীত্যর্থে দর্শযামি নমঃ।

ওঁ বং জলতত্ত্বাত্মকং নৈবেদ্যং শ্রীমহাবিদ্যাপ্রীত্যর্থে নিবেদযামি নমঃ।

ওঁ সং সর্বতত্ত্বাত্মকং তাম্বূলং শ্রীমহাবিদ্যাপ্রীত্যর্থে নিবেদযামি নমঃ।

অথ শ্রীমহাবিদ্যাকবচম্

ওঁ প্রাচ্যাং রক্ষতু মে তারা কামরূপনিবাসিনী।

আগ্নেয্যাং ষোডশী পাতু যাম্যাং ধূমাবতী স্বযম্ ॥ ১॥

নৈরৃত্যাং ভৈরবী পাতু বারুণ্যাং ভুবনেশ্বরী।

Stotram Digitalized By Sanskritdocuments.org

বাযব্যাং সততং পাতু ছিন্নমস্তা মহেশ্বরী ॥ ২॥

কৌবের্যাং পাতু মে দেবী শ্রীবিদ্যা বগলামুখী ।
ঐশান্যাং পাতু মে নিত্যং মহাত্রিপুরসুন্দরী ॥ ৩॥

ঊর্ধ্বং রক্ষতু মে বিদ্যা মাতঙ্গীপীঠবাসিনী ।
সর্বতঃ পাতু মে নিত্যং কামাখ্যা কালিকা স্বযম্ ॥ ৪॥

ব্রহ্মরূপা মহাবিদ্যা সর্ববিদ্যামযী স্বযম্ ।
শীর্ষে রক্ষতু মে দুর্গা ভালং শ্রীভবগেহিনী ॥ ৫॥

ত্রিপুরা ভ্রুযুগে পাতু শর্বাণী পাতু নাসিকাম্ ।
চক্ষুষী চণ্ডিকা পাতু শ্রোত্রে নিলসরস্বতী ॥ ৬॥

মুখং সৌম্যমুখী পাতু গ্রীবাং রক্ষতু পার্বতী ।
জিহ্বাং রক্ষতু মে দেবী জিহ্বাললনভীষণা ॥ ৭॥

বাগ্দেবী বদনং পাতু বক্ষঃ পাতু মহেশ্বরী ।
বাহূ মহাভুজা পাতু করাঙ্গুলীঃ সুরেশ্বরী ॥ ৮॥

পৃষ্ঠতঃ পাতু ভীমাস্যা কট্যাং দেবী দিগম্বরী ।
উদরং পাতু মে নিত্যং মহাবিদ্যা মহোদরী ॥ ৯॥

উগ্রতারা মহাদেবী জঙ্ঘোরূ পরিরক্ষতু । ?? উগ্রাতারা

গুদং মুষ্কং চ মেঢ্রং চ নাভিং চ সুরসুন্দরী ॥ ১০॥

পাদাঙ্গুলীঃ সদা পাতু ভবানী ত্রিদশেশ্বরী ।

রক্তমাংসাস্থিমজ্জাদীন্ পাতু দেবী শবাসনা ॥ ১১॥

মহাভয়েষু ঘোরেষু মহাভয়নিবারিণী ।

পাতু দেবী মহামায়া কামাখ্যাপীঠবাসিনী ॥ ১২॥

ভস্মাচলগতা দিব্যসিংহাসনকৃতাশ্রয়া ।

পাতু শ্রীকালিকাদেবী সর্বোৎপাতেষু সর্বদা ॥ ১৩॥

রক্ষাহীনং তু যৎস্থানং কবচেনাপি বর্জিতম্ ।

তৎসর্বং সর্বদা পাতু সর্বরক্ষণকারিণী ॥ ১৪॥

http://mysiddhashram.blogspot.com/2011/10/ten-mahavidya-kavachtml

Proofread by KS Ramachandran ramachandran underscore ksr at yahoo.ca

and Psa Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

Dasha Mahavidya Kavacham Lyrics in Bengali PDF
% File name : dashamahAvidyAkavacham.itx
% Category : kavacha
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : KS Ramachandran ramachandran_ksr@yahoo.ca, PSA Easwaran
% Description/comments : http://mysiddhashram.blogspot.com/2011/10/ten-mahavidya-kavach.html
% Latest update : May 2, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 14, 2015 ] at Stotram Website